# ॥ રાત્રિસૂક્તાત્મકં દેવીસ્તોત્રમ્ ॥

.. rAtrisUktAtmakaM devIstotram ..

sanskritdocuments.org

August 20, 2017

# .. rAtrisUktAtmakaM devIstotram ..

# ॥ રાત્રિસૂક્તાત્મકં દેવીસ્તોત્રમ્ ॥

## Sanskrit Document Information

Text title : devIstotramrAtrisUktAtmakaM

File name : devIstotramrAtrisUktAtmakaM.itx

Category : devii

Location : doc_devii

Language : Sanskrit

Subject : philosophy/hinduism/religion

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description-comments : Brihatstotraratnakara 2, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 225-425

Latest update : March 22, 2017

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ રાત્રિસૂક્તાત્મકં દેવીસ્તોત્રમ્ ॥

શ્રીગણેશાય નમઃ ॥

રાત્રિદેવીં પ્રપદ્યેઽહં શરણાગતવત્સલામ્ ।
કરાલવદનાં કૃષ્ણાં દુષ્ટગ્રહવિનાશિનીમ્ ॥ ૧॥

નમામિ ખડ્ગહસ્તાં તાં ખેટહસ્તાં ભયાનકામ્ ।
વરદાભયહસ્તાં ચ ભક્તલોકભયાપહામ્ ॥ ૨॥

શૂલહસ્તાં શઙ્ખચક્રગદાચાપેષુધારિણીમ્ ।
ચતુર્ભુજામષ્ટભુજાં દ્વિભુજામરિમર્દિનીમ્ ॥ ૩॥

અષ્ટાદશભુજાં લક્ષ્મીં દશહસ્તાં સરસ્વતીમ્ ।
સર્વસમ્પત્પ્રદાત્રીં ચ સર્વવિદ્યાપ્રદાયિનીમ્ ॥ ૪॥

સહસ્રબાહુચરણાં સહસ્રમુખલોચનામ્ ।
સહસ્રમુકુટોપેતાં સહસ્રચરણામ્બુજામ્ ॥ ૫॥

પદ્મયોનિમુખાબ્જસ્થાં વિષ્ણુવક્ષઃસ્થલસ્થિતામ્ ।
શિવાઙ્કનિલયાં ગૌરીં વન્દે મૂર્તિત્રયાત્મિકામ્ ॥ ૬॥

આર્ભટ્યા વૈષ્ણવી ચોગ્રા કુલાનિ વિબુધદ્વિષામ્ ।
યા નિર્દહતિ રક્તાક્ષી તાં વન્દે સિંહવાહનામ્ ॥ ૭॥

મધુકૈટભસંહારં મહિષાસુરમર્દનમ્ ।
યાઽકરોન્નૌમિ દુર્ગાં તાં વધં શુમ્ભનિશુમ્ભયોઃ ॥ ૮॥

ઇન્દ્રાદિસર્વદેવાનાં સૂર્યાદિજ્યોતિષામપિ ।
સર્વશક્તિસ્વરૂપા યા રાત્રીં તાં પ્રણમામ્યહમ્ ॥ ૯॥

રાત્રિસૂક્તં જપેદ્રાત્રૌ ત્રિવારં ચ દિને દિને ।
ભૂતપ્રેતપિશાચાદિચોરસર્પાદિનાશનમ્ ॥ ૧૦॥

ઇતિ શ્રીરાત્રિસૂક્તાત્મકદેવીસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by PSA Easwaran psaeaswaran at gmail.com

.. rAtrisUktAtmakaM devIstotram ..

Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLATEX 0.99996
on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*